# Question Paper Code : 21351

**B.A. (Semester-I) (NEP) Examination, 2023**

**( Regular/IMP) ( Major / Minor )**

## SANSKRIT

**[ Paper : First ]**

## ( संस्कृतपद्यसाहित्यम् )

**Time : Three Hours]** **[Maximum Marks : 75**

**निर्देश-** पञ्च प्रश्नाः समाधेयाः। सर्वे प्रश्नाः समानाङ्काः।

1. अधोलिखितयोः सप्रसङ्गव्याख्या विधेया- [15]

(क) महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले।। [7]

(ख) कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्
न धर्मवृद्धेषु वयः समीक्ष्यते।। [8]



https://www.lucknowstudy.com

2. अधोलिखितयोः सप्रसङ्गव्याख्या करणीया-

(क) इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।

(ख) तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता।।

3. निम्नलिखितयोः पद्ययोः व्याख्या करणीया-

(क) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।

(ख) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ।।



https://www.lucknowstudy.com

4. अधोलिखितानां सुभाषितानां व्याख्या संक्षेपेण करणीया- [15]

(क) हितं मनोहारि च दुर्लभं वचः। [5]

(ख) शरीरमाद्यं खलु धर्मसाधनम् [5]

(ग) मृदुः प्रकृत्या च ससारमेव च। [5]

5. निम्नलिखितयोः पद्ययोः व्याख्या विधेया- [15]

(क) गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः।। [7]

(ख) हरत्यघं संप्रति हेतुरेष्यतः
शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम्।। [8]

6. शिशुपालवधमहाकाव्यस्य प्रथमसर्गस्य सारं स्वभाषया लिखत। [15]

7. भारवेरर्थगौरवमिति-वाक्यं प्रतिपादयत। [15]

8. श्रीहर्षस्य व्यक्तित्वं कृतित्वञ्च वर्णयत। [15]

9. अश्वघोषस्य काल-कुल-कृत्यादि विवरणं लिखत। [15]

10. कुमारसम्भवस्य पञ्चमसर्गानुसारं पार्वत्याः कठोरतपः वर्णयत। [15]

------x------



https://www.lucknowstudy.com